National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2018; 1(17): 102-103
© 2018 NJHSR
www.sanskritarticle.com

**आचार्यः के गणपतिभट्टः**
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः

**Correspondence:**
**आचार्यः के गणपतिभट्टः**
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः

# “भारतीयज्ञानपरम्परायाः मूलम् ऋग्वेदः - एकमध्ययनम्”

**आचार्यः के गणपतिभट्टः**

**शोधसारः**

भारतीयसंस्कृतेः सनातनधर्मस्य तथा भारतीयज्ञानपरम्परायाः मूलं वेदराशिः। तत्रापि ऋग्वेदः विशिष्टः, प्राचीनसंस्कृतिः देशस्य प्रौढिमा, भाषायाः विकासः, आधुनिकव्यवहाराणां तथा यान्त्रिकविद्यानाम्, आधुनिकचिन्तनस्य काव्यनाटकवेदान्तव्याकरणशिल्पसंगीततर्कमीमांसादीनां सर्वेषां शास्त्राणाम् आधुनिकविज्ञानानां यज्ञयागाद्यैहिकानां फलप्रयोजकानां कर्मणाम्, आमुष्मिकानां च फलप्रदायकानां विहितविधीनां, छन्दोबद्धानां मन्त्राणां, तद्द्रष्टृणाम् ऋषीणां, तद्वंशानां, तच्छिष्याणां, अग्न्यादिसमस्तदेवतानां, उपदेवतानां, समस्तलोकानां सृष्टिः, विविधप्राणिनां, क्रीडानाम्, आख्यायिकानां संवादानाम् अनितरसाधारण-शब्दप्रयोगाणां विशिष्टानाम् अर्थानां निगूढतत्त्वानां पाश्चात्यानां पण्डितानाम् अपि श्रद्धोत्पादकत्वम् इत्यादि अनेकविषयाः ऋग्वेदे एव विलसन्ति।

संस्कृतग्रन्थेषु वेदस्य यत् अग्रस्थानम् न कस्याप्यन्यस्य। व्याकरणादिसर्वशास्त्राणाम् आकरो वेद एव। वेदः यद्यपि ऋग्वेदादिक्रमेण व्यासेन विभक्तः तथापि चत्वारोऽपि भागाः मिलित्वा एक एक ज्ञानराशिः।

ऋग्वेदादिकं प्रकरणचतुष्टयमिति वक्तव्यम् भवति। वेद इति समष्टिग्रन्थे ऋचायुक्तः ऋग्वेदः तत्रस्थानेव मन्त्रान् उपयुज्य यज्ञविधानं यजुर्वेदेन, ऋङ्म्माध्यमेन देवतानां स्तुतिः तथा किञ्चित् स्वरवैलक्षण्येन गानात्मकेन सामवेदः, इति त्रयः वेदाः यज्ञोत्पादकाः अभीष्टसिद्धिदायकाः। चतुर्थो वेदः त्रयाणां वेदानां परिशिष्टरूपः यज्ञादीनां उपयुक्तो न भवति परिशिष्टात्मकत्वात्। यद्यपि वेदः समष्ट्यात्मकः तथापि एकैकोऽपि वेदः स्वस्वविषये स्वातन्त्र्यं भजते।

वेदाध्ययनविध्यनुसारेण ब्राह्मणेन निष्कारणेन सर्वोऽपि वेदः षडङ्गयुक्तः अध्येतव्यः ज्ञेयश्च, परन्तु मनुजस्य परमायुः शतं वर्षाणीति तदभ्यन्तरे वेदस्सर्वोपि अध्येतुं न शक्यत इति प्रथमतः स्वशाखामधीत्य इतरशाखाध्ययनं यथाशक्ति कर्तव्यम्। तेन च वेदानां यथाकथाञ्चित् संरक्षणं भवितुमर्हतीति एकैकां शाखामधीत्य चालिनीन्यायेन वेदस्य ज्ञानराशेः संरक्षणं कर्तुं शक्यते इति वेदपरम्परापि संरक्षिता भवति, सनातनधर्मोऽपि परिरक्षितो भवतीति स्वशाखाध्ययनेन कृतकृत्यतां मनुते मानवः।

एतादृशस्य वेदस्य अर्थज्ञानार्थं निरुक्तम् अत्युत्कृष्टं कार्यमावहति। निरुक्तस्य निघण्टुः इति विभागोऽपि प्रसिद्धः। निघण्टौ एकार्थकान् शब्दान् एकत्रीकृत्य पदानां समूहानां अयमर्थ इति व्यवस्था। निरुक्ते पुनः मुख्यतः काश्चन ऋचः गृहीत्वा अथवा निचाय्य तत्रत्यानां पदानां अर्थनिष्पत्तिः ऋषीणामभिप्रायः इतिहासः इतिवृत्तम् इत्यादिव्यवस्थानुसारेण सन्दर्भानुसारेण च अर्थविवरणं प्रदीयते। तत्प्रमाणं च भवति। कदाचित् निरुक्तानुसारेण विवक्षितार्थाः मूलार्थेन भिद्यन्ते च।

**“ निरुक्तस्य वैशिष्ट्यम् ”**

निरुक्तानुसारेण तथा निघण्ट्वनुसारेण केषाञ्चन मन्त्राणां तदन्तर्गतशब्दानां च व्युत्पत्तिप्रदर्शन पुरस्सरम् अर्थविवरणं कुर्मः।

**“अग्निमीळे पुरोहितम् यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्”**[1] इति प्रथमो मन्त्रः।

अत्र ईळे इनि क्रियापदम्। वस्तुतः इदम् ईडे इति स्यात् यतो हि ईड-स्तुताविति धातुः[2] इति सूत्रानुसारेण इड धातुतः ईडे इति निष्पतिः। परन्तु बह्वृचाः यथासम्प्रदायं ईळे इत्येवानुपूर्वी वदन्ति पठन्ति च।

सम्प्रदायवादिनः इत्थमूचुः –

अज्मध्यस्थ उकारस्य ळकारं बह्वृचा जगुः।
अज्मध्यस्थ ढकारस्य ह्ळुकारं वै यथाक्रमम् इति।

ई+ड्+म् – ईळे – यतो हि ईकोरकारयोः मध्यवर्तिनः डकारस्य ळकारत्वम् एवमेव यदि ढकारो ह्ळकारो भवति। यथा –

**“अषाह्ळं युत्सु प्रतनासु पप्रिम्”**[3]

अषाढमित्यत्र ढकारस्य आ-अकारयोः मध्यवर्तित्वात् ह्ळका-रोच्चारणम्, एवं च एतादृशाः भेदाः व्याकरणनिघण्ट्वादिना ज्ञातव्याः भवन्ति।

एवमग्निशब्दस्य आद्यस्य भाष्यकाराः अनेकनिष्पत्तिं प्रदर्शयन्ति। अग्नेः स्वभावं स्वरूपं च मनसि निधाय ते तथा चक्रुः। व्याकरणादिना अवयवार्थं स्वीकृत्य ते तथा वदन्ति इति तु सत्यम्। व्याकरणद्वारा अवयवशक्त्या वा योगरूढ्या वा शब्दानामर्थकल्पनं न कष्टसाध्यम्। परन्तु तत् वेदे नैव युज्यते न सुलभसाध्यञ्च।

अग्निशब्दनिर्वचनसन्दर्भे यास्काः इत्थमामनन्ति –

“अथानुक्रमिष्यामो अग्निः पृथिवीस्थानस्थं प्रथमं व्याख्यास्यामः। कस्मात् अग्रणीः भवति ? अग्रं यज्ञेषु प्रणीयते। अंगं नयति। संनममानो अवनोपनो भवतीति स्थौलाष्ठीविर्न कोपयति न स्नेहयति। त्रिभ्यः अरण्याख्येभ्यः जायत इति शाकपूणिरितात्। अक्तात् दग्धाद्वा नीतात् स खलु इतेरकारमाददे, गकारमनक्तेर्वा, दहतेर्वा, नीः परस्तस्यैषा भवत्यग्निमीळे।

अस्य अर्थवर्णनावसरे अग्निस्वरूपं पश्यामः अग्नेः स्थानं भूः तथा द्यौः। भौतिकाभौतिकरूपेण अग्निः - अग्रणीरस्ति। कुतः ?

अग्निः देवानां सेनानिः इति – ब्राह्मणवाक्यम्। अग्निमुखः प्रथमं देवतानाम्।[4] अग्निर्वै देवानामवमः[5] अग्निरग्रे प्रथमो देवतानाम्[6] एतादृशप्रमाणैः ज्ञायते यत् अग्निः अग्रणीरिति - एवं यजुश्शाखाध्यायिनः “स वा येषो अग्रे देवतानामजायत तस्मादग्निर्नामेति”। स्वतः अग्निः देवान्-पुरतः स्थित्वा गमयति। नाम नायक इत्यर्थः।

यागप्रक्रियायाम् अग्निहोत्र-पशुबन्ध-सोमेत्यादियागेषु गार्हपत्येति-नामकात् अग्निकुण्डात् आहवनीय अग्निकुण्डप्रदेशं प्रथमतः नीयते इति अग्नेः अग्निरिति नाम समञ्जसम्। अग्निः स्वतः स्वशरीरेण काष्ठप्रभृतिसर्वं, यद्यागे समर्पितम् दाहयति, पाचयति स्वयं दहतीत्यग्निः। स्थूलाष्ठीवपुत्रः स्थौलाष्ठीविन् इति कश्चन निरुक्तकारः अन्यार्थमपि वक्ति “न क्नोपयतीत्यक्नोपनः क्नु स्नेहे इति धातुः नाम केनापि सह स्नेहमेव न प्रदर्शयति दहनविषये।

एवमेव अन्ये निरुक्तकाराः इण गताविति धातुः[7] अक्तोञ्जू-व्यक्तिम्रक्षणकान्तिगतिषु – दह - भस्मीकरणे इति – दग्धः[8]। नीतः – णीञ् प्रापणे इति[9]। अग्निशब्दः अकारगकारनिकारैः समुत्पन्नः इण् गताविति धातुना निष्पन्न एति इति रूपतः अग्निशब्दस्य अकारः, अनक्ति धातौ अक्तोञ्जु इत्यत्र ककारस्य गकारः, अथवा दह भस्मीकरणे इत्यस्मात् निष्पन्न दग्ध इत्यस्मिन् रूपे विद्यमानः गकारः, नयति धातुतः णीञ् प्रापणे इत्यस्मादुत्पन्न नी इति दीर्घाक्षरं ह्रस्वं भूत्वा नि इति च त्रिभिरक्षरैः अग्निः (अ+ग्+नि) इति भवति। पूर्वोक्तैः त्रिभिर्धातुभिः अग्निशब्दस्योत्पत्तिः। यज्ञभूमौ समागत्य काष्ठान् भस्मीकृत्य हवींषि च पाचयित्वा सर्वस्यापि अग्रणीः अग्निर्भवतीति निरुक्तकाराणामभिप्रायः। इदं च वैशिष्ट्यं निरुक्तस्य,

अग्नयः भक्तं सेवमानम् अभक्तमसेवमानं च व्यन्तः ये ते प्राणिनः अनुग्राह्याः इति बुद्ध्यमानाः अवः – रक्षन्ति। अग्नयो व्यन्ताः अजराः – स्वयं हविषा अजरास्सन्तः यजमानमपि गार्हपत्याह-वनीयदक्षिणाग्नयः अजरां कुर्वन्ति इत्ययमपि अग्नेर्विशेष इति निरुक्तानामभिप्रायः।

एवमेव पुरोहितशब्दविषये देवशब्दविषये निरुक्तकाराः इत्थमा-मनन्ति।

अग्निं याचामीळिरध्येषणकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातः। यज्ञस्य देवः - दानाद्वा दीपनाद्वा, घोतनाद्वा द्युस्थानो भवति इति वा यो देवः सा देवता होतारं ह्वातारं जुहोतेः होतेत्यौर्णभावः। रमणीयानां धनानां दातृतमं रत्नधातमम्। परः एनं दधातीति पुरोहितः। यद्देवापि शं तनवे स पुरोहितः, सर्वकार्येषु पुरतो भुत्वा सञ्चालकः अग्रस्थाने विद्यमानेत्यादयः अर्थाः।

एवमेव आयुश्शब्दः यद्यपि जीवितकालः, तथापि निरुक्तकाराः प्रकरणानुसारेण अन्नमित्यर्थं वर्णयन्ति। अदस्यायुर्ग्रभणवत् इत्यत्र[10] मन्त्रे।

एवमेव ब्रह्म, असुर, इन्द्र, भारती, सरस्वती, मरुदश्विन्यादि-देवताकाः शब्दाः अर्थवैशिष्ट्यं भजन्ते इति, एवं विलक्षणाः अत्यन्तमपूर्वाः – शुशुक्वान् इत्यादीन् अग्रे निरूपयामः।

**संदर्भः**

1 ऋग्वेदे 1-1-1
2 धातुः – 24-9
3 ऋग्वेदे 1-91-21
4 ऐ-ब्रा-1-5
5 ऋग्वेदे 1-1-1
6 तै-ब्रा - 2.4.3.3
7 धातुः – 24-36
8 धातुः – 32-22
9 धातुः – 22-5
10 ऋग्वेदे - 2.1.11